# Shri Maharajni Stotram 2 Maharajni Stavaraja

# શ્રીમહારાજ્ઞીસ્તોત્રમ્ ૨ મહારાજ્ઞીસ્તવરાજઃ

## Document Information

Text title : Maharajni Stotram 2 Maharajni Stavarajah

File name : mahArAjnIstotram2.itx

Category : devii, otherforms, devI, stavarAja

Location : doc_devii

Transliterated by : Harmander Singh

Proofread by : Harmander Singh

Latest update : August 18, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 19, 2024

*sanskritdocuments.org*

# શ્રીમહારાજ્ઞીસ્તોત્રમ્ ૨ મહારાજ્ઞીસ્તવરાજઃ

ૐ શ્રીભૈરવ ઉવાચ ।
અધુના કથયિષ્યામિ સ્તોત્રરાજં પરાત્પરમ્ ।
મૂલમન્ત્રમયં દિવ્યં તત્ત્વભૂતં મનોહરમ્ ॥

રાજ્ઞીપ્રિયં પાપહરં લક્ષપૂજાફલપ્રદમ્ ।
જપલક્ષસમં સ્તોત્રં ધ્યાનકોટિસમં પ્રિયે ॥

રાજ્ઞીસ્તોત્રસ્ય દેવેશિ બ્રહ્મા ઋષિરુદાહૃતઃ ।
ગાયત્રી છન્દ ઇત્યુક્તં શ્રીરાજ્ઞી દેવતેરિતા ॥

માયા બીજં પરા શક્તિઃ કામઃ કીલકમીશ્વરિ ।
ભોગાપવર્ગસિદ્ધ્યર્થે વિનિયોગઃ પ્રકીર્તિતઃ ॥

ૐ અસ્ય શ્રીમહારાજ્ઞીસ્તવરાજસ્ય શ્રીબ્રહ્માઋષિઃ ।
ગાયત્રી છન્દઃ, શ્રીમહારાજ્ઞી ભૂતેશ્વરી દેવતા,
હ્રીં બીજં, સૌઃ શક્તિઃ, ક્લીં કીલકં,
આત્મનો આત્મનો વાઙ્મનઃકાયોપાર્જિતપાપનિવારણાર્થં
શ્રીમહારાજ્ઞીપ્રસાદદ્વારા ભોગાપવર્ગસિદ્ધ્યર્થે,
પાઠે વિનિયોગઃ ॥

ધ્યાનમ્ ।
ઉદ્યદ્દિવાકરસહસ્રરુચિં ત્રિનેત્રાં
સિંહાસનોપરિગતામુરગોપવીતામ્ ।
ખડ્ગામ્બુજાઢ્યકલશામૃતપાત્રહસ્તાં
રાજ્ઞીં ભજામિ વિકસદ્વદનારવિન્દામ્ ॥

તારમિન્દુકલિકાવતંસિતં
વેદસાગરમણિં મનોહરમ્ ।
યો જપેદુષસિ રત્નમાલયા

રાજ્યમાશુ લભતે સ સાધકઃ ॥ ૧॥

ભૂતિમિન્દુનવબિમ્બમણ્ડિતાં
નાદવિન્દુલલિતાં જપેત્તુ યઃ ।
વારમેકમુરુવારણસ્થિતો
જેષ્યતિ સ્મયમયાનડરીન્રણે ॥ ૨॥

રસાં જપેદ્યો ભુવનેશિ મન્ત્રી
ત્વન્મન્ત્રમધ્યે મદનોપતપ્તઃ ।
રમ્ભાં સમાલિઙ્ગ્ય વિમાનચારી
લીલાં ભજેન્નન્દનવાટિકાયામ્ ॥ ૩॥

વહ્નિબીજમણિમાદ્યસિદ્ધિદં
બિન્દુબિમ્બશશિખણ્ડમણ્ડિતમ્ ।
યો જપેન્નિશિ ધનાભિલાષવાન્
સ ક્ષણાદ્ભવતિ વિત્તદોપમઃ ॥ ૪॥

કામરાજમમરાભિવન્દિતં યો
જપેન્નિધુવનેઽક્ષમાલયા ।
તસ્ય યાન્તિ વશતાં સુરાઙ્ગનાઃ
કિં પુનર્જગતિ ભૂભૃદઙ્ગનાઃ ॥ ૫॥

શક્તિં ભક્ત્યા યો જપેચ્છક્તિપૂજા-
કાલે કાલીપાદપદ્માર્પિતાન્તઃ ।
નક્તં તસ્ય સ્મેરવક્ત્રા ઘૃતાચી
વશ્યા વેશ્યા સ્વર્ગતા વા શચી ચ ॥ ૬॥

ભગવત્યૈ તથા રાજ્ઞ્યૈ નામમન્ત્રમિતિ સ્મરેત્ ।
યો દેવિ તસ્ય વશ્યાઃ સ્યુર્ભૈરવસ્યાષ્ટસિદ્ધયઃ ॥ ૭॥

માયાં નમોન્તે યદિ સાધકેન્દ્રો
જપેન્મહેશાનિ શિવાલયસ્થઃ ।
તત્રૈવ દેવીં પરમાર્થરાજ્ઞીં
પશ્યેત્સ સદ્યો વરસિદ્ધિદાત્રીમ્ ॥ ૮॥

ઠદ્વયં યદિ જપેન્નિશાક્ષયે
ક્ષીરભુક્ સ્વતટિનીતટસ્થિતઃ ।

જિષ્ણુ વિષ્ણુકમલાસનેશ્વરા
યાન્તિ દેવિ વશતાં તદા ક્ષણાત્ ॥ ૯॥

ભૂગેહવૃત્તત્રયનાગપત્ર-
ષડારયોન્યશ્રકબિન્દુબિમ્બે ।
નિષેદુષીં રાજકુલાધિદેવીં
રાજ્ઞીં ભજે રાજકલાવતંસામ્ ॥ ૧૦॥

દેવિ શ્રીભૂતધાત્રીપ્રવરગુણમયે
નિષ્કલે નિર્ગુણે મે માયે માતઃ શરણ્યે
ગિરિવરતનયે ચિન્મયે તત્ત્વરૂપે ।
દુર્ગે ચણ્ડિ પ્રમાથે ત્રિપુરવિજયિનિ
સ્મેરવક્ત્રે વરેણ્યે કારુણ્યાઢ્યે પ્રશસ્તે
સુરદિતિજનુતે રાજ્ઞિ વૈ ત્વં પ્રસીદ ॥ ૧૧॥

ઇતિ સ્તોત્રં મન્ત્રસ્ફુરણકરુણાનન્દનિલયં
પઠેદ્ભક્ત્યા પ્રાતસ્તવ ગિરિસુતે યોગનિલયમ્ ।
ભવેત્સદ્યો ભૂમૌ નૃપમુકુટનીરાજિતપદો-
ઽમૃતો મુક્તિં વાન્તે તવ ભવનમાપ્નોતિ વરદે ॥ ૧૨॥

ઇતિ રાજ્ઞ્યાઃ પરં તત્ત્વં પઞ્ચાઙ્ગમખિલં શિવે ।
સર્વસ્વં ચ રહસ્યં ચ સર્વસારસ્વનપ્રદમ્ ॥ ૧૩॥

આનન્દવર્ધનં ગુહ્યં પરમૈશ્વર્યકારણમ્ ।
ભોગાપવર્ગદં પુણ્યં દારિદ્ર્યભયનાશનમ્ ॥ ૧૪॥

રાજ્યપ્રદં ભક્તિકરં સર્વશત્રુનિબર્હણમ્ ।
પઞ્ચાઙ્ગમખિલં દેવ્યા ન વક્તવ્યં દુરાત્મને ।
તવ ભક્ત્યા મયા ખ્યાતં ગોપનીયં પ્રયત્નતઃ ॥ ૧૫॥

ઇતિ શ્રીરુદ્રયામલે તન્ત્રે દશવિદ્યારહસ્યે શ્રીમહારાજ્ઞીસ્તવરાજઃ ॥

શ્રીમહારાજ્ઞીસ્તોત્રમ્

*Shri Maharajni Stotram 2 Maharajni Stavaraja*

pdf was typeset on August 19, 2024

Please send corrections to *sanskrit@cheerful.com*